शयनीयं, क्ली, (शेतेऽस्मिन्निति । शी + अधिकरणे अनीयर् ।) शय्या । इत्यमरः ॥ (यथा, माघे ।११ । ५ ।
"रतिपरिचयनश्यन्नैद्रतन्द्रः कथञ्चित्
गमयति शयनीये शर्वरीं किं करोतु ॥")
शयनयोग्ये, त्रि ॥ (यथा, रामायणे । २ । ७२ ।११ ।
"शुभ्रोऽयं शयनीयस्ते पर्य्यङ्को हेमभूषितः ।
न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मे ॥")

शयनीयकं, क्ली, (शयनीयमेव । स्वार्थे कन् ।) शय्या । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे ।३३ ।१७७ ।
"गत्वा कलिङ्गसेनायाः सुतायाः शयनीयके ।
सुप्तं मदनवेगं तं स्वरूपे स्थितमैक्षत ॥")

शयनैकादशी, स्त्री, (शयनाय शयनस्य वा एकादशी ।) श्रीहरेः शयनसम्बन्धितिथिः । सा आषाढ़शुक्लैकादशी । तद्विवरणं शयनशब्दे हरिशयनशब्दे च द्रष्टव्यम् ॥

शयानकः, पुं, (शी + शानच् । ततः कन् । यद्वा, "आनकः शीङ्भियः ।" इति आनक् ।) सर्पः । इत्युणादिकोषः ॥ कृकलासः । इति हेमचन्द्रः ॥

शयालुः, त्रि, (शयनशीलः । शी + "शीङो ग्रहणं कर्त्तव्यम् । ३ ।२ ।१५८ । इत्यस्य वार्त्तिकोक्त्या आलुच् । ) निद्रालुः । इत्यमरः ॥ (यथा, माघे । २ । ८० ।
"उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः ।
हन्ति नोपशयस्थोऽपि शयालुर्म्मृगयुर्म्मृगान् ॥")

शयालुः, पुं, (शी + आलुच् । अजगरः ।) कुक्कुरः । इति हारावली ॥

शयितः त्रि, (शी + क्तः ।) निद्रालुः । इत्यमरः ॥ (कृतशयनः । यथा, कथासरित्सागरे ।५६।१८७।
"तयोः स्वपितयोः स्वामि भुक्ते भोजितयोस्तयोः ।
शये शयितयोस्तेन ज्ञानमीदृग्विधं मम ॥")
वसन्तकुसुमे, पुं । यथा, —
"वसन्तकुसुमः शेलुः शयितो द्विजकुत्सितः ॥"
इति शब्दमाला ॥
शयने, क्ली ॥

शयितवान्, त्रि, निद्रालुः । शीङ्धातोः क्तवतु-प्रत्ययेन निष्पन्नमेतत् ॥

शयुः, पुं, (शेते इति । शी + उः ।) अजगरः । इत्यमरः ॥ (ऋषिविशेषः । यथा, ऋग्वेदे । १ । ११२ । १६ ॥
"याभिर्नरा शयवे याभिरत्रये ॥"
"हे नरा नेतारावश्विनौ पुरा पूर्वस्मिन् काले शयवे एतत्संज्ञकाय ऋषये ।" इति तद्भाष्यम् ॥ शयाने, त्रि । यथा, ऋग्वेदे । ४ । १८ ।१२ ।
"कस्ते मातरं विधवामचक्रत्
शयुं कस्त्वामजिघांसच्चरन्तम् ॥"
"कस्त्वत्तोऽन्यः शयुं शयानं चरन्तं जाग्रतं वा त्वां अजिघांसत् ।" इति तद्भाष्यम् ॥ )

शयुनः, पुं, अजगरः । इत्युणादिकोषः ॥

शय्या, स्त्री, (शी शयने + "संज्ञायां समजेति ।" ३ । ३ । ९९ । इति क्यप् । ) गुम्फनम् । इति मेदिनी ॥ शीयते यत्र सा । तत्पर्य्यायः । शयनीयम् २ शयनम् ३ । इत्यमरः ॥ तल्पम् ४ । इति जटाधरः ॥ शयनीयकम् ५ । इति शब्दरत्नावली ॥ तस्या गुणाः ।
"सुखशय्यासनं श्रेष्ठ्यं निद्रापुष्टिधृतिप्रदम् ।
श्रमानिलहरं शस्तं विपरीतमतोऽन्यथा ॥
भूशय्यानिलपित्तघ्नी बृंहणी शुक्रवर्द्धिनी ।
खट्टा तु वातला प्रोक्ता पट्टी रूक्षोऽतिवातलः ॥"
इति राजवल्लभः ॥*॥
अपि च ।
"त्रिदोषशमनी खट्टा तूली वातकफापहा ।
भूशय्या बृंहणी हृद्या काष्ठपट्टी तु वातला ॥"
अन्यत् पुनराह ।
"भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी ।
सुशय्याशयनं हृद्यं पुष्टिनिद्राधृतिप्रदम् ।
श्रमानिलहरं हृष्यं विपरीतमतोऽन्यथा ॥"
इति भावप्रकाशः ॥ * ॥
तद्गमनविधानं यथा,—
"कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही ।
गच्छेत् शय्यामस्फुटितामपि दारुमयीं नृप ॥
नाविशालां न वै भग्नां नासमां मलिनां न च ।
न च जन्तुमयीं शय्यामधिगच्छेदनास्तृताम् ॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः ॥*॥
तद्दानफलं यथा । याज्ञवल्क्यः ।
"गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।
यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥"
प्रियं यदृयस्य धर्म्मादि । प्रतिग्रहसमर्थेन शय्या न प्रत्याख्येया । यथा याज्ञवल्क्यः ।
"कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः ।
मांसशय्यासनं धानाः प्रत्याख्येयं न वारि च ॥"
सूतोद्देशकदत्तशय्याग्रहणे दोषो यथा । ब्रह्मपुराणम् ।
"शय्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च ।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा ॥" *॥
सा च शीतानाङ्गिरोदेवताका । यथा, —
"छत्रं कृष्णाजिनं शय्यां रथमासनमेव च ।
उपानहौ तथा यानं तथा यत् प्राणवर्ज्जितम् ।
शीतानाङ्गिरसन्त्वेतत् प्रतिगृह्णीत मानवः ॥"
इति शुद्धितत्त्वम् ॥ * ॥
पुष्याभिषेके शय्यापट्टकं यथा,—
"सर्व्वरत्नमलङ्कारं पट्टं कार्य्यं द्विहस्तकम् ।
हस्तविस्तार उच्छ्राये दशाङ्गुलः सुशोभनम् ॥
स्वनामाख्यं सार्द्धहस्तान्तु पट्टं हस्तासनान्वितम् ।
शय्याख्यं द्विगुणा दैर्घ्याद्धनुर्मानं सपीठकम् ॥"
इति देवीपुराणे त्रैलोक्याभ्युदयपादे पुष्याभिषेकनामाध्यायः ॥

शरं, क्ली (शृ + अप् ।) जलम् । इति मेदिनी ॥

शरः, पुं,(शृणात्यनेनेति । शॄ गि हिंसे + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । ) बाणः । इत्यमरः ॥ (यथा, रघुः । १ । ६१ ।
"तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥")
दध्यग्रभागः । इति मेदिनी ॥ दुग्धशरस्य नामान्तरम् । सन्तानिका । दधिशरस्य नामान्तरम् । दधिसारः । दधिस्नेहः । कट्वरञ्च । इति रत्नमालादयः ॥ तृणविशेषः । कांड़ा इति हिन्दी भाषा । (यथा, महाभारते । १ । १३८ । १५ ।
"आचार्य्यः कलशाज्जातो द्रोणः शस्त्रभृतां वरः ।
गौतमस्यान्ववाये च शरस्तम्बाच्च गौतमः ॥")
तत्पर्य्यायः । इषुः २ काण्डः ३ बाणः ४ मुञ्जः ५ तेजनः ६ गुन्द्रकः ७ । इति रत्नमाला ॥ उत्कटः ८ शायकः ८ क्षुरः १० इक्षुरः ११ क्षुरिकापत्रः १२ विशिखः १३ । अस्य गुणाः । मधुरत्वम् । सतिक्तत्वम् । कोष्णत्वम् । कफश्रान्तिमदापहत्वम् । बलवीर्य्यकारित्वम् । नित्यं निषेवितश्चेत् किञ्चिद्दाहकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"भद्रमुञ्जः शरो बाणस्तेजनश्चेक्षुवेष्टनः ।
मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेधसः ॥
मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा ।
दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित् ।
दोषत्रयहरं हृष्यं मेखलासूपयुज्यते ॥"
इति भावप्रकाशः ॥
उशीरः । महापिण्डीतरुः । इति च राजनिर्घण्टः ॥ हिंसा । इति शृधात्वर्थदर्शनात् ॥ (ज्योतिषोक्तपञ्चमाङ्कः । यथा साहित्यदर्पणे । ४ । २६४ ।
"वेदखाग्निशराः शुद्धे रिपुवाणाग्निसायकाः ॥")

शरजं, क्ली, (शरात् जायते यत् तत् । जन् + डः ।) हैयङ्गवीनम् । इति हेमचन्द्रः ॥ नवनीतम् । इति केचित् ॥

शरजन्मा, [न्] पुं, (शरे शरवणे जन्म यस्य ।) कार्त्तिकेयः । इत्यमरः ॥ (यथा, रघुः, ।३।२३।
"उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥")

शरटः,पुं, (शॄ + शकादित्वात् अटन् ।) कुसुम्भशाकः । इति रत्नमाला ॥ कृकलासः । इत्यमरटीका ॥ ( यथा,—
"भद्रस्य काय्यां शरटः प्रविष्टः ॥"
इति हास्यार्णवे ॥ )

शरणं,क्ली, (शृणाति दुःखमनेनेति । शॄ + ल्युट् ।) गृहम् ( यथा, महाभारते । १ । १०६ । ४ ।
"ततोऽग्निकायां प्रथमं नियुक्तः सत्यवाग्दृषिः ।
दीप्यमानेषु दीपेषु शरणं प्रविवेश ह ॥" )
रक्षिता । इत्यमरः ॥ (यथा, चाणक्यशतके ।८१।